# सप्तमः पाठः

प्राचीन-काले आभारतं आबालवृद्धं च प्रसृता आसीत् संस्कृतवाणी। अनन्तरं चिरकालं यावद् उत्तरोत्तरं घटमाना इयं क्षीणा जाता। अद्यत्वे पुनरियं किञ्चिद् वर्धमाना दृश्यते। पुरा कदाचिदिह भारते अजस्रं प्रवहन्ती इयं संस्कृतगङ्गा पुनरपि लोकहिताय देवलोकाद् अवतारणीया इति धिया नैके भगीरथाः प्रयत्नवन्तः सन्ति। तेन च चतुर्दिक्षु संस्कृतजगति किञ्चित् स्पन्दनं स्फुरणं वा अवलोक्यते। संस्कृतानुकूलस्य वातावरणस्य निर्माणमारब्धम्। बहुकालादनन्तरं विद्यालयेषु अधीयानाः लघवः बालकाः अपि तत्र तत्र संस्कृतेन सम्भाषणं कुर्वन्तः दृश्यन्ते। बालानाम् आकर्षणाय संस्कृतगीतानि अपि एकः सरलः उपक्रमः। तेन संस्कृतभाषा-संस्कारोऽपि अनायासं जन्यते। विगतेषु केषुचिद् वर्षेषु नानाविधानि नवानि संस्कृतगीतानि रचितानि। पाठेऽस्मिन् अतीव सरलया भाषया सरलया च शैल्या संस्कृतगीतमेकं प्रस्तूयते। आयान्तु, पठन्तु, शृण्वन्तु, अभ्यस्यन्तु, गायन्तु च अतीव सरलं-तरलं-सरसं च गीतमिदम्।

## लोकहितं मम करणीयम्

(हिन्दोलरागः) (आदितालः)

**मनसा सततं स्मरणीयम्**
**वचसा सततं वदनीयम्**
**लोकहितं मम करणीयम्।।** ।। लोकहितं ।।

**न भोगभवने रमणीयम्**
**न च सुखशयने शयनीयम्।**
**अहर्निशं जागरणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

**न जातु दुःखं गणनीयम्**
**न च निजसौख्यं मननीयम्।**
**कार्य - क्षेत्रे त्वरणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

**दुःखसागरे तरणीयम्**
**कष्टपर्वते चरणीयम्।**
**विपत्तिविपिने भ्रमणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

**गहनारण्ये घनान्धकारे**
**बन्धुजना ये स्थिता गह्वरे।**
**तत्र मया सञ्चरणीयम्**
**लोकहितं मम करणीयम्।।** ।। मनसा ।।

-डॉ. श्रीधर भास्कर वर्णेकरः

## शब्दार्थाः

**मनसा**- हृदयेन, चित्तेन (मन के द्वारा)। **सततम्**- निरन्तरम्। **स्मरणीयम्**- स्मरणं कर्त्तव्यम्। **वचसा**- वचनेन, वाण्या। **वदनीयम्**- वक्तव्यम्। **लोकहितम्**- लोकस्य हितम्, लोक-कल्याणम्। **करणीयम्**- कर्त्तव्यम्, करण-योग्यम्। **भोगभवने**- भोगानाम् आवासे-निवासे, भौतिके संसारे। **अहर्निशम्**- अहनि (दिने) च रात्रौ च, रात्रिन्दिवम्, अहोरात्रम्। **जातु**- कदाचित्, कदापि। **कार्यक्षेत्रे**- कर्मक्षेत्रे। **विपिने**- वने। **गहनारण्ये**- गहने-गभीरे अरण्ये-वने। **घनान्धकारे**- निबिडान्धकारे। **गह्वरे**- गर्ते, कन्दरायाम्।

## सन्धिविच्छेदः

गहनारण्ये- गहन+अरण्ये
घनान्धकारे- घन+अन्धकारे

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. अस्माकं करणीयं किमस्ति —
(अ) निर्धनानां साहाय्यम् (आ) रोगिणां सेवा
(इ) ज्ञानस्य धनस्य च दानम् (ई) लोकहितम् ( )

२. अस्माभिः कुत्र न शयनीयम् —
(अ) सुखशय्यायाम् (आ) शरशय्यायाम्
(इ) परशय्यायाम् (ई) तृणशय्यायाम् ( )

३. लोकहिताय कदा जागरणीयम् —
(अ) दिने (आ) रात्रौ
(इ) अहर्निशम् (ई) अन्येषु सुप्तेषु जागरणीयम् ( )

४. कुत्र तरणीयम् —

(अ) दुःखसागरे (आ) दुस्तरसागरे

(इ) सुखसागरे (ई) गंगासागरे ( )

५. अस्मिन् गीते आहत्य कति अनीयर्-प्रत्ययान्तानि (स्मरणीयम् इत्यादीनि) पदानि प्रयुक्तानि-

(अ) दश (आ) पञ्चदश

(इ) षोडश (ई) सप्तदश ( )

**लघूत्तरात्मक-प्रश्नाः**

१. त्वरणीयम् तरणीयम् च इत्यनयोः द्वयो कः अर्थभेदः ?

२. अस्माभिः कुत्र सञ्चरणीयम् ?

३. अधोलिखित-पदानां पर्यायपदं पाठाद् अन्विष्य लिखन्तु —

१. जनकल्याणम् ...............

२. वाण्या ...............

३. चलनीयम् ...............

४. बान्धवाः ...............

५. तमसि ...............

४. स्थूलपदमाधृत्य प्रश्न-निर्माणं कुर्वन्तु —

१. **अहर्निशं** जागरणीयम्।

२. न जातु **दुःखं** गणनीयम्।

३. न **भोगभवने** रमणीयम्।

४. **मनसा** सततं स्मरणीयम्।

५. अधोलिखित-पदेषु मूलधातुं प्रत्ययं च पृथक् कृत्वा लिखन्तु —

| पदम् | धातुः | + | प्रत्ययः |
|---|---|---|---|
| १. स्मरणीयम् | .......... | + | .......... |
| २. करणीयम् | .......... | + | .......... |
| ३. रमणीयम् | .......... | + | .......... |
| ४. जागरणीयम् | .......... | + | .......... |

६. संस्कृतेन वाक्य-निर्माणं (अधोदत्त-पदानि प्रयुज्य) कुर्वन्तु-

१. अहर्निशम् .........................

२. तत्र .........................

३. न जातु .........................

**निबन्धात्मक-प्रश्नाः**

१. 'गहनारण्ये......करणीयम्' इत्यस्य श्लोकस्य हिन्द्या अनुवादः करणीयः।

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (ई) २. (अ) ३. (इ) ४. (अ) ५. (ई)

**परियोजना-कार्यम्**

१. संस्कृत-गीतानां कामपि ध्वनिमुद्रिकां सान्द्रमुद्रिकां वा स्वीकृत्य, अन्तर्जाल-साहाय्यं वा स्वीकृत्य, कस्यचिद् संस्कृत-गायकस्य वा सविधे गत्वा कानिचन गीतानि अभ्यस्य कक्षायां शिक्षकस्य पुरतः प्रस्तोतव्यानि।

२. अस्मिन् गीते 'स्मरणीयम्' इत्यादीनि सप्तदश अनीयर्-प्रत्ययान्तानि पदानि प्रयुक्तानि, तदतिरिच्य नवानि कानिचन दश तादृशानि पदानि प्रयुज्य वाक्य-निर्माणं क्रियताम्। उदाहरणम् - 'अस्माभिः प्रतिदिनं पठनीयम्।'

(अवधेयम् : अस्मिन्नेव पुस्तके अग्रे व्याकरण-भागे अनीयर्-प्रत्यय-विषयकं विवरणं पठनीयम्)